तदात्वे तत्काले।
“यदा प्रहृष्टा मन्येत सर्व्वास्तु प्रकृतीर्भृशम्।
अत्युच्छ्रितं तथात्मानं तदा कुर्व्वीत विग्रहम्॥
यदा मन्येत भावेन हृष्टं पुष्टं बलं स्वकम्।
परस्य विपरीतञ्च तदा यायाद्रिपुं प्रति॥
यदा तु स्यात् परिक्षीणो वाहनेन बलेन च।
तदासीत प्रयत्नेन शनकैः सान्त्वयन्नरीन्॥
मन्येतारिं यदा राजा सर्व्वथा बलवत्तरम्।
तदा द्विधा बलं कृत्वा साधयेत् कार्य्यमात्मनः॥
यदा परबलानान्तु गमनीयतमो भवेत्।
तदा तु संश्रयेत् क्षिप्रं धार्म्मिकं बलिनं नृपम्॥
निग्रहं प्रकृतीनाञ्च कुर्य्याद्योऽरिबलस्य च।
उपसेवेत तं नित्यं सर्व्वयत्नैर्गुरुं यथा॥
यदि तत्रापि संपश्येत् दोषं संश्रयकारितम्।
सुयुद्धमेवं तत्रापि निर्व्विशङ्कः समाचरेत्॥
सर्व्वोपायैस्तथा कुर्य्यान्नीतिज्ञः पृथिवीपतिः।
यथास्याभ्यधिका न स्युर्मित्रोदासीनशत्रवः॥
आयतिं सर्व्वकार्य्याणां तदात्वञ्च विचारयेत्।
अतीतानाञ्च सर्व्वेषां गुणदोषौ च तत्त्वतः॥
आयत्यां गुणदोषज्ञस्तदात्वे क्षिप्रनिश्चयः।
अतीते कार्य्यशेषज्ञः शत्रुभिर्नाभिभूयते॥
यथैनं नाभिसन्दध्युर्मित्रोदासीनशत्रवः।
तथा सर्व्वं संविदध्यादेष सामासिको नयः॥
यदा तु यानमातिष्ठेदरिराष्ट्रं प्रति प्रभुः।
तदानेन विधानेन यायादरिपुरं शनैः॥
मार्गशीर्षे शुभे मासि यायाद्यात्रां महीपतिः।
फाल्गुनं वाथ चैत्रं वा मासौ प्रति यथाबलम्॥
अन्येष्वपि तु कालेषु यदा पश्येद्ध्रुवं जयम्।
तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोः॥
कृत्वा विधानं मूले तु यात्रिकञ्च यथाविधि।
उपगृह्यास्पदञ्चैव चारान् सम्यग्विधाय च॥
संशोध्य त्रिविधं मार्गं षड्विधञ्च बलं स्वकम्।
साम्परायिककल्पेन यायादरिपुरं शनैः॥
शत्रुसेविनि मित्रे च गूढे युक्ततरो भवेत्।
गतप्रत्यागते चैव स हि कष्टतरो रिपुः॥
दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा।
वराहमकराभ्यां वा सूच्या वा गरुड़ेन वा॥
यतश्च भयमाशङ्केत्ततो विस्तारयेद्बलम्।
पद्मेन चैव व्यूहेन निविशेत सदा स्वयम्॥
सेनापतिबलाध्यक्षौ सर्व्वदिक्षु निवेशयेत्।
यतश्च भयमाशङ्केत् प्राचीं तां कल्पयेद्दिशम्॥
गुल्मांश्च स्थापयेदाप्तान् कृतसंज्ञान् समन्ततः।
स्थाने युद्धे च कुशलानभीरूनविकारिणः॥*॥
संहतान् योधयेदल्पान् कामं विस्तारयेद्बहून्।
सूच्या वज्रेण चैवैतान् व्यूहेन व्यूह्य योधयेत्॥
स्यन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा।
वृक्षगुल्मावृते चापैरसिचर्म्मायुधैः स्थले॥
कुरुक्षेत्रांश्च मत्स्यांश्च पञ्चालान् शूरसेनजान्।
दीर्घान् लघूंश्चैव नरानग्रानीकेषु योधयेत्॥
प्रहर्षयेद्बलं व्यूह्य तांश्च सम्यक् परीक्षयेत्।
चेष्टाश्चैव विजानीयादरीन् योधयतामपि॥
उपरुध्यारिमासीत राष्ट्रं चास्योपपीड़येत्।
दूषयेच्चास्य सततं यवसान्नोदकेन्धनम्॥
भिन्द्याच्चैव तड़ागानि प्राकारपरिखास्तथा।
समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा॥
उपजप्यानुपजपेद्बुध्येतैव च तत्कृतम्।
युक्ते च दैवे युध्येत जयप्रेप्सुरपेतभीः॥
साम्ना दानेन भेदेन समस्तैरथवा पृथक्।
विजेतुं प्रयतेतारीन्न युद्धेन कदाचन॥
अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः।
पराजयश्च संग्रामे तस्माद्युद्धं विवर्ज्जयेत्॥
त्रयाणामप्युपायानां पूर्व्वोक्तानामसम्भवे।
तथा युध्येत संयत्तो विजयेत रिपून् यथा॥*॥
जित्वा सम्पूजयेद्देवान् ब्राह्मणांश्चैव धार्म्मिकान्।
प्रदद्यात् परिहारांश्च ख्यापयेदभयानि च॥
सर्व्वेषान्तु विदित्वैषां समासेन चिकीर्षितम्।
स्थापयेत्तत्र तद्वंश्यं कुर्य्याच्च समयक्रियाम्॥
प्रमाणानि च कुर्व्वीत तेषां धर्म्म्यान् यथो-
दितान्।
रत्नैश्च पूजयेदेनं प्रधानपुरुषैः सह॥
आदानमप्रियकरं दानञ्च प्रियकारकम्।
अभीप्सितानामर्थानां काले युक्तं प्रशस्यते॥
सर्व्वं कर्म्मेदमायत्तं विधाने दैवमानुषे।
तयोर्द्दैवमचिन्त्यन्तु मानुषे विद्यते क्रिया॥
सह वापि व्रजेद्युक्तः सन्धिं कृत्वा प्रयत्नतः।
मित्रं हिरण्यं भूमिं वा सम्पश्यंस्त्रिविधं फलम्॥
पार्ष्णिग्राहञ्च संप्रेक्ष्य तथाक्रन्दञ्च मण्डले।
मित्रादथाप्यमित्राद्वा यात्राफलमवाप्नुयात्॥”
आक्रन्दः पार्ष्णिग्राहस्य नियामको राजा।
“हिरण्यभूमिसम्प्राप्त्या पार्थिवो न तथैधते।
यथा मित्रं ध्रुवं लब्ध्वा कृशमप्यायतिक्षमम्॥*॥
धर्म्मज्ञञ्च कृतज्ञञ्च तुष्टप्रकृतिमेव च।
अनुरक्तं स्थिरारम्भं लघु मित्रं प्रशस्यते॥
प्राज्ञं कुलीनं शूरञ्च दक्षं दातारमेव च।
कृतज्ञं धृतिमन्तञ्च कष्टमाहुररिं बुधाः॥
आर्य्यता पुरुषज्ञानं शौर्य्यं करुणवेदिता।
स्थौललक्ष्यञ्च सततमुदासीनगुणोदयः॥”
स्थौललक्ष्यं बहुप्रदत्वम्।
“क्षेम्यां शस्यप्रदां नित्यं पशुवृद्धिकरीमपि।
परित्यजेन्नृपो भूमिमात्मार्थमविचारयन्॥
आपदर्थं धनं रक्षेद्दारान् रक्षेद्धनैरपि।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि॥
सह सर्व्वाः समुत्पन्नाः प्रसमीक्ष्यापदो भृशम्।
संयुक्तांश्च वियुक्तांश्च सर्व्वोपायान् सृजेद्बुधः॥
उपेतारमुपेयञ्च सर्व्वोपायांश्च कृत्स्नशः।
एतत् त्रयं समाश्रित्य प्रयतेतार्थसिद्धये॥”
उपेतारं आत्मानम्। उपेयं प्राप्यम्॥*॥
“एवं सर्व्वमिदं राजा सह सम्मन्त्र्य मन्त्रिभिः।
व्यायाम्याप्लुत्य मध्याह्ने भोक्तुमन्तःपुरं विशेत्॥
तत्रात्मभूतैः कालज्ञैरहार्य्यैः परिचारकैः।
सुपरीक्षितमन्नाद्यमद्यान्मन्त्रैर्व्विषापहैः॥
विषघ्नैरगदैश्चास्य सर्व्वद्रव्याणि योजयेत्।
विषघ्नानि च रत्नानि नियतो धारयेत् सदा॥
परीक्षिताः स्त्रियश्चैनं व्यजनोदकधूपनैः।
वेशाभरणसंशुद्धाः स्पृशेयुः सुसमाहिताः॥
एवं प्रयत्नं कुर्व्वीत यानशय्यासनाशने।
स्नाने प्रसाधने चैव सर्व्वालङ्कारकेषु च॥
भुक्तवान् विहरेच्चैव स्त्रीभिरन्तःपुरे सह।
विहृत्य तु यथाकालं पुनः कार्य्याणि चिन्तयेत्।
अलङ्कृतश्च संपश्येदायुधीयं पुनर्ज्जनम्।
वाहनानि च सर्व्वाणि शस्त्राण्याभरणानि च॥
सन्ध्याञ्चोपास्य शृणुयादन्तर्व्वेश्मनि शस्त्रभृत्।
रहस्याख्यायिनाञ्चैव प्रणिधीनाञ्च चेष्टितम्॥
गत्वा कक्षान्तरं त्वन्यत् समनुज्ञाप्य तं जनम्।
प्रविशेद्भोजनार्थञ्च स्त्रीवृतोऽन्तःपुरं पुनः॥
तत्र भुक्त्वा पुनः किञ्चित्तूर्य्यघोषैः प्रहर्षितः।
संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः॥
एतद्विधानमातिष्ठेदरोगः पृथिवीपतिः।
अस्वस्थः सर्व्वमेतत्तु भृत्येषु विनियोजयेत्॥”
इति मानवे ७ अध्यायः॥*॥
कालीकापुराणोक्तराजधर्म्मः ८५। ८६ अध्या-
ययोः द्रष्टव्यः। महाभारतोक्तराजधर्म्मः शान्ति-
पर्व्वणि द्रष्टव्यः। पद्मपुराणोक्तराजधर्म्मः स्वर्ग-
खण्डे १३८ अध्याये द्रष्टव्यः॥

राजधानकं, क्ली, (धीयतेऽनेनेति। धा + ल्युट्।
ततः कन्। राज्ञां धानकं नगरम्।) राज-
पुरम्। इति शब्दरत्नावली॥

राजधानी, स्त्री, (धीयतेऽस्यामिति। धा + अधि-
करणे ल्युट्। ङीप्। राज्ञां धानी नगरी।)
राजधानिका। तत्पर्य्यायः। कोट्टः २ राज-
धानकम् ३। इति शब्दरत्नावली॥ स्कन्धा-
वारः ४। इति हेमचन्द्रः॥ (यथा, रघुः।२।७०।
“तौ दम्पती स्वां प्रति राजधानीं
प्रस्थापयामास वशी वशिष्ठः॥”)

राजधान्यं, क्ली, (राजप्रियं धान्यम्।) श्यामाकः।
इति राजनिर्घण्टः॥ (यथा, वृहत्संहिता-
याम्।१५।१२।
“वाहि भूयणमणिरागलेख्यगान्धर्व्वगन्धयुक्तिज्ञाः।
गणितपटुतन्तुवायाः शालाक्या राजधान्यानि॥”)

राजधुस्तूरकः, पुं, (धुस्तूरकाणां राजा। राजदन्ता-
दित्वात् परनिपातः।) हृद्धुस्तूरः। तत्पर्य्यायः।
राजधूर्त्तः २ महाशठः ३ निस्त्रैणपुष्पकः ४
भ्रान्तः ५ राजस्वर्णः ६। इति राजनिर्घण्टः॥
अस्य गुणाः धुस्तूरशब्दे द्रष्टव्याः॥

राजनामा, [न्] पुं, (राज्ञो नाम नाम यस्य।)
पटोलः। इति राजनिर्घण्टः॥

राजनीतिः, स्त्री, (राज्ञां नीतिः।) राज्ञां नयः।
यथा, चाणक्यपण्डितकृतप्रथमः श्लोकः।
“नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयम्।
सर्व्वबीजमिदं शास्त्रं चाणक्यं सारसंग्रहम्॥”
सा यथा,—
“गदितं बलिशुक्राभ्यां श्रुत्वा भागवतोऽसुरः।
प्राह धर्म्मार्थसंयुक्तं प्रह्लादो वाक्यमुत्तमम्॥
यदायत्तां चमं राजन्! यद्धितं भुवनस्य ह।
अविरोधेन धर्म्मस्य अर्थस्योपार्ज्जनञ्च यत्॥
सर्व्वसत्त्वानुगमनं कामवर्गफलञ्च यत्।